पुरी रम्या शक्रस्येवामरावती" इत्युपक्रम्य "यदीच्छेत् सागरः किञ्चिदुत्स्रष्टुमिह तोयराट् । ततः स्वायतलक्षण्या पुरी स्यात् पुरुषोत्तम । एवमुक्तस्ततः कृष्णः प्रागेव कृतनिश्चयः । सागरं सरितां नाथमुवाच वदतांवरः । समुद्र ! दश च द्वे च योजनानि जलाशये । प्रतिसंह्रियतामात्मा यद्यस्ति मयि मान्यता । अवकाशे त्वया दत्ते पुरीयं मामकं बलम् । पर्य्याप्तविषयारामा समग्रं विषहिष्यति ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः । स मारुतेन योगेन उत्ससर्ज्ज जलाशयम्" । इति हरिवंशः ।

**अब्धिनवनीतक** पु० अब्धेर्नवनीतमिव कायति प्रकाशते कै-क । चन्द्रे-ग०र० तस्य क्षीरसारतुल्यत्वात् तथात्वम् ।

**अब्धिफेन** पु० ६त० । समुद्रफेने ।

**अब्धिमण्डूकी** स्त्री अब्धिं मण्डयति मण्ड—उक गौरा० ङीष् ६त० । मुक्तासाधने शुक्तौ ।

**अब्धिशय** पु० अब्धौ शेते शी—अच् ७त० । समुद्रस्थवटपत्रशय्यायाम् अहौ वा शय्यायां शायिनि विष्णौ । खण्डप्रलयमुपक्रम्य "ततस्तं मारुतं घोरं स्वयम्भूर्मनुजाधिप ! । आदिःपद्मालयोदेवः पीत्वा स्वपिति भारत ! । तस्मिन्नेकार्णवे घोरे" इत्युपक्रम्य ॥ "ततः कदाचित् पश्यामि तस्मिन् सलिलसञ्चये । न्यग्रोधं सुमहान्तं वै विशालं पृथिवीपते ! । शाखायां तस्य वृक्षस्य विस्तीर्णायां नराधिप ! । पर्य्यङ्के पृथिवीपाल ! विस्मयः सुमहानभूत् । कथं त्वयं शिशुःशेते लोके नाशमुपागते भा०व० मार्क०प० १८८३ देवीमाहात्म्ये तु "एकार्णवेऽहिशयने योगनिद्रामुपागत" इत्यहिशयनत्वमुक्तम् ।

**अब्धयग्नि** पु० अब्धौ स्थितोऽग्निः । वड़वानले तत्कथा और्वशब्दे द्रष्टव्या । अब्धिदहनादयोऽप्यत्र ।

**अबभक्ष** पु० अपो भक्षयति भक्ष—अण् उप०स० । १सर्पभेदे २जलमात्राहारे त्रि० । "अब्भक्षो वायुभक्षश्च उपवास परस्तत" इति पुरा० ।

**अबभ्र(भ्र)** न० अपोबिभर्त्ति क अभ्र-गतौ-अच् वा वा द्वित्वम् । १ मेघे "अ(भ्रा)ब्भ्राणि विभ्राणसमाङ्गसङ्गेति" माघः । २मेघनामायां मुस्तायाम्, (आभ) ३ धातुभेदे च । मेघतुल्याकारत्वात्तस्य तथात्वम् । ४ मेघाधारे आकाशे न० ।

**अब्भ्रं(भ्रं)लिह** पु० अब्भ्रं(भ्रं) लेढि स्पृशति लिह—खश् मुम् च । उच्चशिखरे "अभ्रंलिहाग्रं रविमार्गभङ्गमिति" भट्टिः । "अभ्रंलिहानि लिलिहे नयपल्लवानीति" माघः ।

**अबभ्र(भ्र)क** पु० अब्भ्र(भ्र)मिव कायति राजते कै—क । (आभ) धातुभेदे । मेघतुल्याकारत्वात्तस्य तथात्वम् ।

**अबभ्र(भ्र)ङ्कष** त्रि० अ(ब्भ्रं)भ्रं मेघं कषति शोषयति कष—खच् मुम् च । १वायौ । २अत्युच्चे त्रि० ।

**अब्भ्(भ्र)पुष्प** न० अबभ्र(भ्र)स्य पुष्पमिव शुभ्रत्वात् कार्श्यत्वाच्च । १जले । अबभ्र(भ्र)मिव पुष्पमस्य ब० । २वेतसवृक्षे पु० । [ऐरावते गजे तस्य मेघनायकत्वात्तथात्वम् ।

**अब्भ्(भ्र)मातङ्ग** पु० अबभ्रा(भ्रा)धिपः मातङ्गः शा०त० ।

**अब्भ्(भ्र)मु** स्त्री अबभ्रे(भ्रे) अबभ्रा(भ्रा)धिपे ऐरावते माति मा—डु । ऐरावतस्य योषिति पूर्व्वदिग्गजस्त्रियाम् ।

**अबभ्र(भ्र)मुवल्लभ** पु० अबभ्र(भ्र)मोः वल्लभः ६त० । ऐरावते गजे । अबभ्र(भ्र)—मुपत्यादयोऽप्यत्र ।

**अबभ्र(भ्र)रोहम्** पु० अबभ्रा(भ्रा)त् तच्छब्दात् रोहति रुह—अङुन् । वैदूर्य्यमणौ तस्य हि मेघशब्दादुद्भव इति प्रसिद्धम् "विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव" कु०वर्णितम्

**अब्भ्रो(भ्रो)त्थ** न० अ(बभ्र)भ्रात् तद्विवर्षणादुत्तिष्ठति उद्+स्था—क । १ वज्रे २ विद्युदग्नौ पु० अ(भ्र)बभ्रजादयोऽप्यत्र । [नौकामलापकर्षके काष्ठमये कुद्दाले ।

**अब्भ्रि(भ्रि)** स्त्री अभ्र गतौ इन् वा द्वित्वम् । काष्ठकुद्दाले

**अबिभ्र(भ्रि)य** त्रि० अब्भ्रे(भ्रे)भवः घ । मेघभवे ।

**अब्रह्मचर्य्य** न० विरोधे न०त० । १ ब्रह्मचर्य्यविरोधिनि स्त्रीसंभोगादौ ब्रह्मचर्य्यं च स्त्रीस्मरणादि तच्च ब्रह्मचर्य्यशब्दे वक्ष्यते । न०ब० । २ ब्रह्मचर्य्यरहिते त्रि० ।

**अब्रह्मण्य** न० ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु यत् विरोधे न०त० । १ब्रह्मकर्म्मण्यसाधौ २हिंसादौ तथात्वेन नोदनविषये ३वचने च तथा हि "अयं न बध्य" इति कथने हि न हिंस्यते । हिंसा च ब्रह्मकर्म्मणि न साधुः इत्यतस्तस्य तथात्वम् एतच्च प्रायेण नाट्योक्तावेव प्रयुज्यते "भो अब्रह्मण्यमब्रह्मण्यं वर्त्तते" नाटकम् । क्वचिदन्यत्रापि "अथैत्य योगनन्दस्य व्याड़िना क्रन्दितं पुरः । अब्रह्मण्यमनुक्रान्तजीवो योगस्थितोद्विजः" इहत्कथासारः ।

**अब्राह्मण** पु० अप्राशस्त्ये न०त० । १अप्रशस्तब्राह्मणे "समसब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे" इति पुरा० अब्राह्मणास्च षट् स्मृतौ दर्शिताः । "अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना । आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी तृतीयो बहुयाज्यःस्याच्चतुर्थो ग्रामयाजकः । पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च । अनागतान्तु यः पूर्व्वां सादित्यां चैव पश्चिमाम् । नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः" आ०त०यात्रा० । एवमन्येऽपि इत्यु-